# garUDadhvajastotram or bhagavatstutiH by Dhruva

# ગરુડધ્વજસ્તોત્રમ્ અથવા ધ્રુવકૃતા ભગવત્સ્તુતિઃ

## Document Information

Text title : garUDadhvajastotram

File name : garuDadhvaja.itx

Category : vishhnu, vishnu_misc, stotra, vishnu, deities_misc

Location : doc_vishhnu

Author : Traditional

Proofread by : Balaji, PSA Easwaran

Description-comments : shrImadbhAgavatamahApurANe chaturthaskandhe navamo.adhyAyaH. There is another Dhruvastuti in Vishnupurana.

Latest update : November 22, 2001, December 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 5, 2021

*sanskritdocuments.org*

. iti shrImadbhAgavatapurANe chaturthaskandhe navamAdhyAyAntargataM dhruvakRitaM shrIgaruDadhvajastotraM sampUrNam . —> . iti shrImadbhAgavatapurANAntargat shrIgaruDadhvajastotraM sampUrNam . > > (shrImadbhAgavate mahApurANe pAramahaMsyAM saMhitAyAM > chaturthaskandhe dhruvarAjyAbhiShekavarNanaM nAma navamo.adhyAyaH)

# ગરુડધ્વજસ્તોત્રમ્ અથવા ધ્રુવકૃતા ભગવત્સ્તુતિઃ

ધ્રુવ ઉવાચ ।
યોઽન્તઃ પ્રવિશ્ય મમ વાચમિમાં પ્રસુપ્તાં
 સઞ્જીવયત્યખિલશક્તિધરઃ સ્વધામ્ના ।
અન્યાંશ્ચ હસ્તચરણશ્રવણત્વગાદીન્
 પ્રાણાન્નમો ભગવતે પુરુષાય તુભ્યમ્ ॥ ૧॥

એકસ્ત્વમેવ ભગવન્નિદમાત્મશક્ત્યા
 માયાખ્યયોરુગુણયા મહદાદ્યશેષમ્ ।
સૃષ્ટ્વાઽનુવિશ્ય પુરુષસ્તદસદ્ગુણેષુ
 નાનેવ દારુષુ વિભાવસુવદ્વિભાસિ ॥ ૨॥

ત્વદ્દત્તયા વયુનયેદમચષ્ટ વિશ્વં
 સુપ્તપ્રબુદ્ધ ઇવ નાથ ભવત્પ્રપન્નઃ ।
તસ્યાપવર્ગ્યશરણં તવ પાદમૂલં
 વિસ્મર્યતે કૃતવિદા કથમાર્તબન્ધો ॥ ૩॥

નૂનં વિમુષ્ટમતયસ્તવ માયયા તે
 યે ત્વાં ભવાપ્યયવિમોક્ષણમન્યહેતોઃ ।
અર્ચન્તિ કલ્પકતરું કુણપોપભોગ્ય-
 મિચ્છન્તિ યત્સ્પર્શજં નિરયેઽપિ નૄણામ્ ॥ ૪॥

યા નિર્વૃતિસ્તનુભૂતાં તવ પાદપદ્મ-
 ધ્યાનાદ્ભવજ્જનકથાશ્રવણેન વા સ્યાત્ ।
સા બ્રહ્મણિ સ્વમહિમન્યપિ નાથ મા ભૂત્
 કિન્ત્વન્તકાસિલુલિતાત્ પતતાં વિમાનાત્ ॥ ૫॥

ભક્તિં મૂહુઃ પ્રવહતાં ત્વયિ મે પ્રસઙ્ગો
 ભૂયાદનન્ત મહતામમલાશયાનામ્ ।
યેનાઞ્જસોલ્બણમુરુવ્યસનં ભવાબ્ધિં

નેષ્યે ભવદ્ગુણકથામૃતપાનમત્તઃ ॥ ૬॥

તે ન સ્મરન્ત્યતિતરાં પ્રિયમીશમર્ત્યં
યે ચાન્વદઃ સુતસુહૃદ્ગૃહવિત્તદારાઃ ।
યે ત્વબ્જનાભ ભવદીયપદારવિન્દ-
સૌગન્ધ્યલુબ્ધહૃદયેષુ કૃતપ્રસઙ્ગાઃ ॥ ૭॥

તિર્યઙ્નગદ્વિજસરીસૃપદેવદૈત્ય-
મર્ત્યાદિભિઃ પરિચિતં સદસદ્વિશેષમ્ ।
રૂપં સ્થવિષ્ઠમજ તે મહદાદ્યનેકં
નાતઃપરં પરમ વેદ્મિ ન યત્ર વાદઃ ॥ ૮॥

કલ્પાન્ત એતદખિલં જઠરેણ ગૃહ્ણન્
શેતે પુમાન્ સ્વદૃગનન્તસખસ્તદઙ્કે ।
યન્નાભિસિન્ધુરુહકાઞ્ચનલોકપદ્મ-
ગર્ભે દ્યુમાન્ ભગવતે પ્રણતોઽસ્મિ તસ્મૈ ॥ ૯॥

ત્વં નિત્યમુક્તપરિશુદ્ધવિશુદ્ધ આત્મા
કૂટસ્થ આદિપુરૂષો ભગવાંસ્ત્ર્યધીશઃ ।
યદ્બુદ્ધ્યવસ્થિતિમખણ્ડિતયા સ્વદૃષ્ટ્યા
દ્રષ્ટા સ્થિતાવધિમખો વ્યાતિરિક્ત આસ્સે ॥ ૧૦॥

યસ્મિન્ વિરુદ્ધગતયો હ્યનિશં પતન્તિ
વિદ્યાદયો વિવિધશક્તય આનુપૂર્વ્યાત્ ।
તદ્બ્રહ્મવિશ્વભવમેકમનન્તમાદ્ય-
માનન્દમાત્રમવિકારમહં પ્રપદ્યે ॥ ૧૧॥

સત્યાશિષો હિ ભગવંસ્તવ પાદપદ્મ-
માશીસ્તથાઽનુભજતઃ પુરુષાર્થમૂર્તેઃ ।
અપ્યેવમાર્ય ભગવાન્ પરિપાતિ દીનાન્
વાશ્રેવ વત્સકમનુગ્રહકાતરોઽસ્માન્ ॥ ૧૨॥

ઇતિ શ્રીમદ્ભાગવતપુરાણે ચતુર્થસ્કન્ધે નવમાધ્યાયાન્તર્ગતં
ધ્રુવકૃતં શ્રીગરુડધ્વજસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*garUDadhvajastotram or bhagavatstutiH by Dhruva*

pdf was typeset on December 5, 2021

Please send corrections to *sanskrit@cheerful.com*